**केन्द्रीय-विद्यालय-संगठनम् जबलपुरसम्भागः**

**पूर्वपरिषदीय परीक्षा 2025-26**

**संस्कृतम् (कोड-सङ्ख्या- 122)**

**प्रश्नपत्रम्** **कक्षा- दशमी (2025-26)**

**अवधिः – 3 होराः** **पूर्णाङ्काः- 80**

**सामान्यनिर्देशाः-**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे **10** पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे **18** प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| **'क' खण्डः** | **अपठितावबोधनम्** | **10 अङ्काः** |
| **'ख' खण्डः** | **रचनात्मककार्यम्** | **15 अङ्काः** |
| **'ग' खण्डः** | **अनुप्रयुक्तव्याकरणम्** | **25 अङ्काः** |
| **'घ' खण्डः** | **पठितावबोधनम्** | **30 अङ्काः** |

4. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| | | |
|---|---|---|
| | **'क' खण्डः**<br>**अपठितावबोधनम् (10 अङ्काः)** | |
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत**-<br><br>शिक्षा मानवजीवनस्य प्रकाशस्तम्भः इव अस्ति, या अज्ञानान्धकारं निवार्य ज्ञानदीपं प्रज्ज्वालयति। शिक्षा मनुष्यस्य व्यक्तित्वविकासस्य मूलं कारणम् अस्ति। शिक्षया एव मनुष्यः साधारणजीवनात् उत्कृष्टजीवनं प्रति गच्छति। या शिक्षा मनसः, बुद्धेः, आचरणस्य च निर्माणं करोति, सा एव श्रेष्ठशिक्षा इति उच्यते। शिक्षया विवेकः उत्पद्यते, सद्-असत्योः भेदज्ञानं लभ्यते, धर्ममार्गे प्रवृत्तिः भवति।<br><br>शिक्षा मनुष्यं विनीतं, संस्कृतं, शीलवानं च करोति। सा केवलं पुस्तकाध्ययनस्य विषयः न, अपि तु जीवनमार्गदर्शिका अस्ति। शिक्षया समाजः प्रगतिं प्राप्नोति, राष्ट्रं बलवत्तरं भवति। | 10 |

| | | |
|---|---|---|
| | अस्याः अभावे मनुष्यः पशुवत् जीवनं यापयति, तस्मात् उक्तं — "विद्याविहीनः पशुभिः समानः।" अतः सर्वैः शिक्षायाः महत्त्वं ज्ञात्वा शिक्षायै प्रयत्नः कर्तव्यः। यः शिक्षितः स एव सच्चरित्रः, सन्मार्गगामी, समाजस्य गौरवः च भवति।<br><br>**अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(i) शिक्षा कस्य मूलं कारणम् अस्ति?<br>(ii) शिक्षा किं करोति?<br>(iii) कः सच्चरित्रः, सन्मार्गगामी, समाजस्य गौरवः च भवति?<br><br>**आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(i) श्रेष्ठशिक्षा कीदृशी भवति?<br>(ii) विद्यायाः अभावे जीवनं कीदृशं भवति?<br>(iii) शिक्षया किं भवति?<br><br>**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**<br>**ई. यथानिर्देशम् उत्तरत-**<br>**(i) 'अशिक्षितः' इति पदस्य विलोमपदं अनुच्छेदे किं प्रयुक्तम्?**<br>(क) अज्ञानी (ख) मूर्खः<br>(ग) शिक्षितः (घ) गौरवः<br>**(ii) शिक्षा मनुष्यं विनीतं, संस्कृतं, शीलवानं च करोति। अत्र 'संस्कृतं' इत्यस्य विशेष्यपदं किम्?**<br>(क) मनुष्यम् (ख) शीलवानम्<br>(ग) शिक्षा (घ) विनीतम्<br>(iii) **'प्राप्नोति' इति क्रियापदस्य कर्तृपदं किम्?**<br>(क) शिक्षया (ख) समाजः<br>(ग) प्रगतिम् (घ) इव | <br><br><br>2x1=2<br><br><br><br><br>2x2=4<br><br><br><br><br>1<br>3x1=3 |

| | | |
|---|---|---|
| | **‘ख’ खण्डः**<br>**रचनात्मकं कार्यम्      (15 अङ्काः)** | |
| 2.अ<br><br><br><br><br>आ | **भवान् आकाशः। भवान् राजस्थानस्य जयपुरनगरम् आगत्य नूतने विद्यालये प्रवेशं प्राप्तवान्। मञ्जूषायां दत्तानां पदानां सहायतया जयपुरस्य विद्यालयस्य च वर्णनं कुर्वन् मित्रं सौरभं प्रति पत्रं लिखतु।**<br>**मञ्जूषा**<br>**निपुणाः अध्यापकाः अनुशासिताः छात्राः, वातावरणम्, जयपुरनगरे, ऐतिहासिकनगरम्, प्रसन्नः, क्रीडाङ्गणम्, सभागारः, प्राचार्यः, पर्यटनस्थानानि, ग्रीष्मः**<br>**अथवा**<br>**भवती प्राची। जबलपुरस्थे केन्द्रीयविद्यालये दशमीकक्षायां पठति। विद्यालयस्य शुल्कं दातुं भवती असमर्था अस्ति अतः मञ्जूषायां दत्तानां पदानां सहायतया शुल्कक्षमार्थं निवेदयन्ती प्राचार्यं प्रति प्रार्थनापत्रं लिखतु।**<br>**मञ्जूषा**<br>**मम पिता, अस्वस्थः, सदस्याः, माता, शुल्कम्, कर्मकरः, धनसमस्या, गतकक्षायाम्, प्रथमश्रेण्याम्, अनुग्रहं, असमर्थः, निवेदनम्, शुल्कक्षमाम्** | 5 |
| 3.अ | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत-**<br> | 5x1=5 |

| | | |
|---|---|---|
| | **मञ्जूषा**<br><br>**विद्यालये, प्राचार्यः, शिक्षकाः, पुष्पार्चनम्, अम्बेडकरवर्यः, जन्मजयन्ती, संविधानस्य, दलितानां सुधाराय, शिक्षायै, अधिकाराय**<br><br>**अथवा**<br>**मञ्जूषायां प्रदत्तशब्दानां साहाय्येन अधोलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत-**<br><br>**भारतीय-संस्कृतिः**<br><br>**मञ्जूषा**<br><br>**प्राचीना संस्कृतिः, मन्दिराणि, अतिथिसेवा, मातृपितृसेवा, देवपूजाम्, परोपकारः, दानम्, आचरणम्, एकता** | |
| 4. | **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत-**<br><br>(i) **गाँव के दोनों तरफ मार्ग है।**<br>There are roads on both sides of the village.<br>(ii) **विद्यालय में 40 शिक्षक हैं।**<br>There are forty teachers in the school.<br>(iii) **मैं सुबह 5:00 बजे योगासन करता हूँ।**<br>I do yoga at 5 o'clock in the morning.<br>(iv) **गर्मी में पंखे के बिना रहना मुश्किल है।**<br>It is difficult to live without a fan in summer.<br>(v) **हमेशा सत्य बोलना चाहिए।**<br>One should always speak the truth. | 5x1=5 |
| | **'ग' खण्डः**<br>**अनुप्रयुक्तव्याकरणम् (25 अङ्काः)** | |
| 5. अ | **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-**<br>(i) कृषकः क्षेत्रकर्षणं **<u>कुर्वन्+आसीत्।</u>**<br>(ii) दुर्वहमत्र जीवितं जातं **<u>प्रकृतिरेव</u>** शरणम्।<br>(iii) **<u>बुद्धिर्बलवती</u>** तन्वि सर्वकार्येषु सर्वदा। | 4x1=4 |

| | | |
|---|---|---|
| | (iv) न हि **<u>जानामि+अस्य</u>** नामधेयम्।<br>**अथवा**<br>**अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-**<br>(i) मम **<u>बहूनि+अपत्यानि</u>** सन्ति।<br>(ii) क्रोधो हि शत्रुः **<u>प्रथमो नराणाम्।</u>**<br>(iii) यदि न स्यान्नरपतिः **<u>सम्यङ्नेता</u>** ततः प्रजा।<br>(iv) **<u>करुणापरः+गृही</u>** तस्मै आश्रयं प्रायच्छत्। | |
| 6. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत-**<br>(i) सः **<u>वाचि पटुः</u>** अस्ति।<br>(क) वाचिपटुः (ख) वाचपटुः<br>(ग)वाक्पटुः (घ) वाग्पटुः<br>(ii) भूकम्पस्य **<u>दारुणविभीषिका</u>** आसीत्।<br>(क) दारुणा च सा विभीषिका (ख) दारुणी विभीषिका<br>(ग)दारुणो च इयं विभीषिका (घ) दारुणविभीषिका<br>(iii) नास्ति **<u>उद्यमसमो</u>** बन्धुः कृत्वा यं नावसीदति।<br>(क)उद्यमं समः (ख) उद्यमेन समः<br>(ग) उद्यमाय समः (घ) उद्यमात् समः<br>(iv) **<u>अयोग्यः</u>** पुरुषो नास्ति।<br>(क)अ योग्यः (ख) योग्यः नास्ति सः<br>(ग) न योग्यः (घ) अयोग्यः न असौ | 4x1=4 |
| 7. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत-**<br>(i) पुत्रस्य दैन्यं **<u>दृष्ट्वा</u>** अहं रोदिमि।<br>(क)दृश्+क्विप् (ख) दृश्+शतृ<br>(ग)दृश्+क्त्वा (घ) दृश्+शानच्<br>(ii) सर्वे पक्षिणः सज्जायै **<u>गन्तुम्</u>** इच्छन्ति।<br>(क)गन्+तुम् (ख) गम्+तुमुन्<br>(ग)गम्+तुम् (घ) गच्छ+तुमुन्<br>(iii) तथापि वृषः न **<u>उत्थितः</u>**।<br>(क) उत्+स्था+क्तवतु (ख) उत्+स्था+क्त<br>(ग) उत्+स्था+तः (घ) उत्थ+क्त<br>(iv) महानगरमध्ये **<u>चलत्</u>** अनिशं कालायसचक्रम्। | 4x1=4 |

| | | |
|---|---|---|
| | (क) चल्+शानच् (ख) चल्+शतृ<br>(ग) चलत+शतृ (घ) लत्+चतृ | |
| 8. | **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखित-वाक्यानि पुनः लिखत-**<br>**(i) .................गृहं गम्यते।**<br>(क)रामेण (ख) रामः<br>(ग)रामाय (घ) रामात्<br>(ii) **मम भ्राता........... भ्रमति।**<br>(क)उद्याने (ख) उद्यानस्य<br>(ग) उद्यानाय (घ) उद्यानाभ्याम्<br>(iii) **मम पिता.................... विद्यालये द्वारपालः अस्ति।**<br>(क) एकस्मात् (ख) उत्+स्था+क्त<br>(ग) एकस्मै (घ) एकस्मिन् | 3x1=3 |
| 9. | **कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत-**<br>(i) कृष्णा प्रातः...................(7:30) वादने प्रातराशं करोति।<br>(ii) सौरभः प्रातः................(8:00) वादने विद्यालयं गच्छति।<br>(iii) प्रणयः मध्याह्ने..............(1:15) वादने भोजनं करोति।<br>(iv) महिमा सायङ्काले...........(6:45) वादने अभ्यासं करोति। | 4x1=4 |
| 10. | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत**-<br>(i) यावत् अहं कार्यं करोमि.............भवान् पठतु।<br>(ii) अद्य शुक्रवासरः अस्ति...........गुरुवासरः आसीत्।<br>(iii) गायकः .............गीतं गायति।<br>**मञ्जूषा**<br>तावत्, ह्यः, उच्चैः । | 3x1=3 |
| 11. | **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत**-<br>**(i) ........... मिलित्वा गीतं गायन्ति।**<br>(क)सा (ख) ताः<br>(ग)ते (घ) ताम्<br>(ii) **................परितः वृक्षाणि सन्ति।**<br>(क)विद्यालयम् (ख) विद्यालयाय<br>(ग) विद्यालयस्य (घ) विद्यालयः | 3x1=3 |

| | | |
|---|---|---|
| | (iii) **पिता............धनं यच्छति।**<br>(क) भगिन्यै (ख) भगिन्याः<br>(ग) भगिनीम् (घ) भगिन्या | |
| | **'घ' खण्डः**<br>**पठितावबोधनम् (30 अङ्काः)** | |
| 12. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**<br><br>कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुदन् अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषः नोत्थितः।<br>भूमौ पतितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्।<br>सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत् "अयि शुभे ! किमेवं रोदिषि? उच्यताम्" इति। सा च<br>विनिपातो न वः कश्चिद् दृश्यते त्रिदशाधिप!।<br>अहं तु पुत्रं शोचामि, तेन रोदिमि कौशिक!॥<br>"भो वासवः पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति । एतत् भवान् पश्यति न?" इति प्रत्यवोचत्।<br><br>**अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(i) सुरभिः किं दृष्ट्वा रोदिति?<br>(ii) कः क्षेत्रे पपात?<br>(iii) रुदन्तीं सुरभिं दृष्ट्वा कः अपृच्छत्?<br><br>**आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(i) कृषकः दुर्बलं वृषभं कथम् अवर्तत?<br>(ii) सुराधिपः किं पृष्टवान्?<br>(iii) सुरभिः किं उत्तरं दत्तवती?<br><br>**इ. निर्देशानुसारम् उत्तरत-**<br>(i) 'स्वपुत्रं' इति पदस्य विशेषणपदं किं प्रयुक्तम्?<br>(ii) 'पीडयति' इत्यर्थे गद्यांशे कर्तृपदं किं प्रयुक्तम्? | 5<br><br>2x1/2 =1<br><br>2x1=2<br><br>2x1=2 |

| | | |
|---|---|---|
| | **अथवा**<br>**ई. निर्देशानुसारम् उत्तरत-**<br>(i) 'ऋषभः' इत्यस्य किं पर्यायपदं गद्यांशात् चित्वा लिखत।<br>(ii) "एतत् भवान् पश्यति न?" अत्र भवान् इति सर्वनामपदं कस्मै प्रयुक्तम्? | |
| 13. | **अधोलिखिते पद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**<br>गुणी गुणं वेत्ति न वेत्ति निर्गुणो,<br>बली बलं वेत्ति न वेत्ति निर्बलः।<br>पिको वसन्तस्य गुणं न वायसः,<br>करी न सिंहस्य बलं न मूषकः॥<br>त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।<br>परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥<br>**अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(i) मूषकः कस्य बलं न जानाति?<br>(ii) कः धर्मप्रदां वाचं त्यजति?<br>(iii) कः वसन्तस्य गुणं न जानाति?<br>**आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(i) विमूढधीः कीदृशं फलं भुङ्क्ते?<br>(ii) निर्बलः किं न वेत्ति?<br>(iii) विमूढधीः कीदृशीं वाचं वदति?<br>**इ. निर्देशानुसारम् उत्तरत-**<br>(i) 'परुषां' इति पदस्य विशेष्यपदं किं प्रयुक्तम्?<br>(ii) अभ्युदीरयेत् इति क्रियापदस्य कर्तृपदं चित्वा लिखत।<br>**अथवा**<br>**ई. निर्देशानुसारम् उत्तरत-**<br>(i) 'बलहीनः' इत्यस्य किं विलोमपदं प्रयुक्तम्?<br>(ii) परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः। अत्र क्रियापदं किम् अस्ति? | 5<br>2x1/2 =1<br>2x1=2<br>2x1=2 |
| 14. | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**<br>रामः- एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि-क्षत्रियकुल-पितामहयोः सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्त्ता?<br>लवः- भगवान् सहस्रदीधितिः ।<br>रामः- कथमस्मत्समानाभिजनौ संवृत्तौ? | 5 |

| | | |
|---|---|---|
| | विदूषकः- किं द्वयोरप्येकमेव प्रतिवचनम्?<br>लवः- भ्रातरावावां सोदयौं।<br>रामः- समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।<br>लवः- आवां यमलौ।<br>रामः- सम्प्रति युज्यते। किं नामधेयम्?<br>लवः- आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि (कुशं निर्दिश्य) आर्योऽपि गुरुचरणवन्दनायाम्..........................<br>कुशः- अहमपि कुश इत्यात्मानं श्रावयामि।<br>रामः- अहो! उदात्तरम्यः समुदाचारः। किं नामधेयो भवतोर्गुरुः ?<br>**अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(i) रामेण सह कीदृशः समुदाचारः अभवत्?<br>(ii) आर्य इत्यनेन कस्य व्यवहारः क्रियते?<br>(iii) लवकुशयोः कः समरूपः?<br>**आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>(i) रामः वंशविषये किं पृच्छति?<br>(ii) कः वंशस्य कर्ता?<br>(iii) विदूषकः किं पृच्छति?<br>**इ. निर्देशानुसारम् उत्तरत-**<br>(i) 'भ्रातरौ' इति पदस्य विशेषणपदं किं प्रयुक्तम्?<br>(ii) 'श्रावयामि' इत्यर्थे नाट्यांशे कर्तृपदं किं प्रयुक्तम्?<br>**अथवा**<br>**ई. निर्देशानुसारम् उत्तरत-**<br>(i) सूर्यः इत्यस्य किं पर्यायपदं गद्यांशात् चित्वा लिखत।<br>(ii) किं नामधेयो भवतोर्गुरुः? अत्र भवतोः इति सर्वनामपदं कस्मै प्रयुक्तम्? | 2x1/2<br>=1<br><br>2x1=2<br><br>2x1=2 |
| 15. | **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।**<br>क) तदिदानीं **<u>भूकम्पकारणं</u>** विचारणीयं तिष्ठति।<br>ख) उद्याने **<u>पक्षिणां</u>** कलरवं चेतः प्रसादयति।<br>ग) सर्वे **<u>प्रकृतिमातरं</u>** प्रणमन्ति।<br>घ) **<u>चौरस्य</u>** पादध्वनिना अतिथिः प्रबुद्धः। | 4x1=4 |
| 16. | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित श्लोकस्य अन्वये पूरयित्वा पुनः लिखत।**<br>एक एव खगो मानी वने वसति चातकः।<br>पिपासितो वा म्रियते याचते वा पुरन्दरम्॥ | 4x1=4 |

| | | |
|---|---|---|
| | **अन्वयः**- एक(1).......... मानी खगः(2)......... वने वसति, वा(3).........म्रियते (4).............याचते वा॥<br>**मञ्जूषा**<br>चातकः, पिपासितः, पुरन्दरम्, एव<br>**अथवा**<br>**मञ्जूषाया: साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखतु -**<br>निमित्तमुद्दिश्य हि यः प्रकुप्यति ध्रुवं स तस्यापगमे प्रसीदति।<br>अकारणद्वेषि मनस्तु यस्य वै कथं जनस्तं परितोषयिष्यति ॥<br>**भावार्थः**- यः (1)_______उद्दिश्य प्रकुप्यति तस्य (2)_________सः ध्रुवं प्रसीदति। यस्य मनः (3)______(अस्ति) जनः तं कथं(4)__________?<br>**मञ्जूषा**<br>अपगमे, परितोषयिष्यति, निमित्तं, अकारणद्वेषि | |
| 17. | **अधोलिखित-कथांशं समुचित क्रमेण लिखत -**<br>क) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।<br>ख) प्रत्युत्पन्नमतिः सा शृगालम् आक्षिपन्ती उवाच।<br>ग) जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।<br>घ) मार्गे सा एकं व्याघ्रं अपश्यत्।<br>ङ) व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच- अधुना एकमेव व्याघ्रः विभज्य भुज्यताम्।<br>च) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता।<br>छ) त्वं व्याघ्रत्रयम् आनेतुं प्रतिज्ञाय एकमेव आनीतवान्।<br>ज) गलबद्धशृगालकः व्याघ्रः पुनः पलायितः। | 8x1/2 =4 |
| 18. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**<br>क) किं कुपिता एवं **भणति**, उत प्रकृतिस्था?<br>(अ) गच्छति (आ) कथयति (इ) लिखति (ई) हसति<br>ख) सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि **आविरासन्**।<br>(अ) पृष्टा (आ) उक्ताः (इ) प्रकटिताः (ई) स्थिताः<br>ग) यूयम् सर्वे एव मे सन्ततयः।<br>(अ) जलधिः (आ) पुत्राः (इ) सम्पदः (ई) पक्षिणः | 3x1 =3 |